च श्रुतेस्तस्य गन्धशून्यत्वात् तथात्वम् । अल पर्य्याप्तौ अच् न०त० । अपर्य्याप्ते अपरिमिते परमेश्वरे "पवनः-पावनोऽनल" इति वि०सह० । भाष्यकृता च उक्तव्युत्पत्तिः विष्णुविषयत्वे दर्शिता ।

**अनलदीपन** त्रि० अनलं जठरानलं पित्तधातुवर्द्धनेन दीपयति वर्द्धयति दीप–णिच्–ल्यु । जठरानलोद्दीपके "मधुरो मधुरः पाके दीपनोऽनलदीपन इति" "सौगन्ध्यात् पूतिकोष्णघ्नः सौक्ष्म्यग्राह्यनलदीपन" इति च सुश्रुतोक्ते द्रव्यभेदे । [नामिकायां लतायाम् ।

**अनलप्रभा** स्त्री अनलस्य प्रभेव प्रभा यस्य ब० । ज्योतिष्मती-

**अनलप्रिया** स्त्री ६त० । स्वाहाख्यायां दक्षकन्यायाम् वह्निपत्न्याम् ।

**अनलि** पु० अनिति अन–अच् अनः अलिर्यत्र ब० । वकवृक्षे तत्पुष्पस्य बहुमधुमत्त्वेन तन्मधुभिर्भ्रमराणां जीवनधारणात्तथात्वम् ।

**अनल्प** त्रि० न अल्पः । प्रचुरे भूयिष्ठे । [शून्ये त्रि० ।

**अनवकाश** पु० न०त० । अवकाशाभावे । ब० । अवकाश

**अनवगीत** त्रि० अव+गै–क्त न०त० । अनिन्दिते ।

**अनवग्रह** त्रि० नास्ति अवग्रहो यस्य । प्रतिबन्धशून्ये "अवश्यभव्येष्वनवग्रहग्रहेति" नैष० । न०त० । वृष्टिप्रतिबन्धाभावे ।

**अनवद्य** त्रि० न अवद्यं निन्द्यम् । निन्द्यभिन्ने दोषशून्ये च "अनवद्यतृणार्द्दिनो मृगानिति" नैष० । "अनवद्यविद्योद्द्योतेनेति" दायभा० । "अनवद्योरिशादा" इति ऋ०६,६६,१०, "अनवद्योगर्हारहित" इति भा० । "अग्निः शर्द्धमनवद्यं युवानमिति" ऋ० १,७१,८ ।

**अनवधान** न० न अवधीयते मनः संयुज्यते कर्त्तव्यकर्म्मणि यथावस्थितं प्रवर्त्त्यतेऽनेन अव+धा–करणे ल्युट् अवधानम् चित्तवृत्तिभेदः अभावे न०त० । अवधानाभावे मनःसंयोगविशेषाभावे प्रमादे, न०ब० । तद्वति त्रि० ।

**अनवधानता** स्त्री अवधानं नास्ति यस्य तस्य भावः । प्रमादे । कर्त्तव्येऽकर्त्तव्यताबोधेन ततोनिवृत्तिः, अकर्त्तव्ये कर्त्तव्यताबोधेन तत्र प्रवृत्तिश्च प्रमादः । "कर्त्तव्याकरणं यत्राकर्त्तव्यस्याथवा क्रिया । उच्यते द्वितयं तत्र प्रमादोऽनवधानतेति" ।

**अनवपृग्ण** त्रि० अव+पृच संपर्के क्त इडभावादि छान्दसम् न०त० । असम्पृक्ते । "अनवपृग्णा वितता वसानमिति" ऋ० १,१५२,४ ।

**अनवब्रव** पु० अव+ब्रू–अच् न वचादेशः न०त० । अपवादवर्जिते "विजेष कृदिन्द्र इवानवब्रवोऽस्माकमिति" ऋ० १०,८४,५ ।

**अनवभ्र** त्रि० न भ्रंशते बा०ड । अवभ्रंशशून्ये "प्रक्षस्मदेष्णा अनवभ्रराधस" इति ऋ० १,१६६,७ । "अनवभ्रराधसः अनवभ्रष्टहविरादिधना" इति भा० ।

**अनवम** त्रि० न अवमः । न्यूनताहीने श्रेष्ठे "सुधर्म्मानवमां सभामिति" रघुः ।

**अनवर** त्रि० न अवरः । अवरभिन्ने श्रेष्ठे अजघन्ये "सोऽयमिन्द्रादनवरो वासुदेवस्य भारतेति भार० ।

**अनवरत** त्रि० अव+रम+भावे क्त अवरतम् विरामः तन्नास्ति यस्य ब० । निरन्तरे विश्रामशून्ये ।

**अनवरार्द्ध्य** त्रि० अवरस्मिन् अर्द्धे भवः यत् न०त० । उत्कृष्टे श्रेष्ठे च शीर्षभागे स्थापनीयतयास्य तत्त्वम् ।

**अनवलम्ब** त्रि० नास्ति अवलम्बो यत्र । आलम्बनहीने । "न परं पथि पक्षपातिताऽनवलम्बे किमु? मादृशोऽपि सेति" नैष० ।

**अनवलोभन** न अवलुप्यते पुमान् येन अव+लुप–ल्युट् पृ० पस्य भः । गर्भसंस्कारभेदे । "उपनिषदि गर्भलम्भनं पुंसवनमनवलोभनञ्चेति" आ० गृ० ।

**अनवस** त्रि० अव–प्रीणनादौ असच् अवसः भोजनं प्रीतिकरत्वात् न०ब० । पथ्याशनहीने "अनवसो अनभीशु" इति ऋ०६,६६,७,"अनवसः पथ्याशनरहित" इति भा० ।

**अनवसर** त्रि० अवसरः उचितः कालः नास्ति यस्य ब० । उचितकालविहीने । "अतर्क्यैश्वर्य्ये त्वय्यनवसरदुःस्थाहतधिय इति महि० स्तो० । न०त० । अवसराभावे ।

**अनवसित** त्रि० अवसितः समाप्तो निश्चितो वा न०त० । अनिश्चिते असमाप्ते च । "अनवसितान्यौ भगौ गुरुरन्ते- इति (छन्द०) उक्ते छन्दोभेदे स्त्री ।

**अनवस्कर** त्रि० अवस्क्रियते शोध्यते अव–कृ–अप् सुडागमः अवस्करो मलः स नास्ति यस्य ब० । मलहीने ।

**अनवस्था** स्त्री अव+स्था–अङ् अवस्थितिः न०त० । अवस्थाभावे, तर्कदोषविशेषे उपपाद्यस्य समर्थनाय उपपादकस्यानुसरणं तर्कः यत्र तर्के उपपाद्योपपादकयोर्विश्रान्ति र्नास्ति तादृशतर्कस्यानवस्थादोषः तत्र स तर्को न ग्राह्यः । अधिकं तर्कशब्दे वक्ष्यते 'प्रामाणिकी अनवस्था न दोषायेति" जग० । नास्ति अवस्था यस्य । अवस्थितिशून्ये त्रि० । "अशरीरं शरीरेषु अनवस्थेष्ववस्थितमिति" ।